IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# ज्योतिषशास्त्रानुसारं ग्रहाणां प्रभाववर्णनम्

**ऋषिरञ्जनः**

**शोधच्छात्रः, ज्योतिषविभागः**

**श्रीलालबहादरशास्त्रीराष्ट्रीयसंस्कृतविश्वविद्यालयः, नवदेहली**

वेदाङ्गशास्त्रेषु ज्योतिषशास्त्रं महत्वपूर्णतमं स्थानं भजते । महर्षिलगधः इदं शास्त्रं "**कालज्ञानं-प्रवक्ष्यामि**"[१] इत्यनेन वचनप्रामाण्येन "**कालविधानशास्त्रम्**" इति संज्ञां अभिहितवान् । वस्तुतः अस्य प्रधानः प्रतिपाद्यविषयः "**कालः**" एव वर्तत्ते । ज्यौतिषं भारतीयमनीषीणां त्यागतपोभ्यां जनितबुध्देः परिणामः विद्यते । अस्य शास्त्रस्य क्रमिकविकासः अस्य सत्यतायाः प्रमाणं वर्तते । अस्य गणितभागः विश्वमानवस्य मस्तिष्कस्य वैज्ञानिक-उन्नतेः मूलं अस्ति ।

**ज्योतींषि ग्रहनक्षत्राण्यधिकृत्य कृतो ग्रन्थो ज्योतिषम्** ।[२]

अखण्डमण्डलाकारः ब्रह्मस्वरूपः अयं ब्रह्माण्डः वस्तुतः शरीरसदृशः वर्त्तते, यदि शरीरस्य कस्मिंश्चिदपि अङ्गे वेदना भवति तदा संपूर्णः देह एव तां वेदनाम् अनुभवति । यथा अस्माकं यदि पादः अग्नौ दग्धः भवति तर्हि अस्माकं सम्पूर्णं शरीरं दग्धजनितकष्टम् अनुभवति ।

तदैव अस्मिन् जगति सर्वाः अपि घटनाः अवश्यमेव ग्रहनक्षत्रेभ्यः संयुक्ताः वर्तत्ते । अस्मिन् जगति यावत्यः घटनाः भवन्ति तासां सम्बन्धः अवश्यमेव ग्रहनक्षत्रैः साकं भवति । पृथ्व्यां यत् किमपि भवति तस्य पृष्ठे ग्रहनक्षत्राण्येव कारणी भूतानि विद्यमानानि भवन्ति , किमपि कार्यं कारणात् अभिन्नमेव भवति । यादृशं कारणं भवति तादृशानुपातेऽपि तस्य कार्यं अपि भवति । यदि वयम् अन्यान् सुखिनः कुर्मः तदा निस्सन्देहेन वयमपि दुःखरहितो भविष्यामः । इदमेव ज्यौतिषं वर्तत्ते । वयं स्वस्य सुखदुःखयोः सौभाग्दुर्भाग्ययोः स्वयमेव कारणीभूताः। विधाता, अन्यो वा नैव आरोहणीयः इति ।

**सुखस्य दुःखस्य न कोऽपि दाता**

**परो ददातीति कुबुद्धिरेषा ।**

**अहं करोमीति वृथाभिमानः**

**स्वकर्मसूत्रग्रथितो हि लोकः।।**[३]

प्राणिनां यदन्यजन्मनि शुभमशुभं वा कर्मार्जितं तस्य कर्मणः प्राप्तिमेतच्छास्त्रं प्रकटीकरोतीति ज्योतिषशास्त्रस्य प्रयोजनम् ।

**कर्मार्जितं पूर्वभवे सदादियत्तस्य पक्तिं समभिव्यनक्ति ।**[४]

सर्वे ग्रहाः आत्मगत्याः स्व स्व कक्षायां परिभ्रमन्ति तथा च भिन्न भिन्न प्राप्तस्थानदनुपाते एव पृथिव्यां प्रतिक्रियाम् अभिवयंजयति, तां प्रतिक्रियां दृष्टिमायाति । ग्रहविनिर्गताःअनन्ताःरश्मयः पृथ्वीं स्पृशन्ति, ताभिः रश्मिभिः सर्वे जीवाः प्रभाविताः भवन्ति । पृथ्वीसापेक्षग्रहाणां अन्तराले यदि किञ्चिदपि भेदः अभविष्यत् तर्हि यादृशी पृथ्वी अद्यत्वे दृश्यते तादृशी नैव अभविष्यत् । पृथ्यां यावत्यः महामार्यः भवन्ति ताः सर्वाः अपि ग्रहनक्षत्रैः संबध्दाः भवन्ति । वैज्ञानिकाः अपि इमां वार्त्तां पोषयन्ति यत् यदा सामान्यवर्णात् यदा सूर्यः भिन्नवर्णीय दृश्यते तदा भयम्, अनावृष्टिः, रोगः इत्यादिनां अधिका वृध्दिर्भवितुम् अर्हति ।

ज्योतिषशास्त्रे वरामिहिरेण अपि प्रोकक्तं यत्

**ग्रीष्मे रक्तो भयकृद्वर्षास्वसितः करोत्यनावृष्टिम् ।**

**हेमन्ते पीतोऽर्कः करोति न चिरेण रोगभयम् ।।**[५]

ग्रीष्मर्तौ रक्तवर्णमयः रविमण्डलः भयकारी भवति, वर्षर्तौ कृष्णवर्णमयः रविमण्डलः अनावृष्टिं करोति तथा च हेमन्तर्तौ पीतवर्णमयः रविमण्डलः शीघ्ररोगान् उत्पादयति ।

भूमण्डलस्य पदार्थेषु आकाशीय पिण्डानां प्रभावो भवति तान् वयं स्वस्य दिनचर्यायां विभिन्न प्रकारैः घटनाभिः प्रत्यक्षीकरणमपि कर्तुं शक्नुमः यथा

१.सूर्योदये सति कमलस्य विकसनं कुमुदिन्याश्च मुखपिधानम्

२. रात्रौ चन्द्रप्रभावेण कुमुदिन्यां विकसनम् ।

३. सूर्यमुखीपुष्पस्य सूर्याभिमुखा वृद्धिः।

४. ग्रहणकाले वनस्पतीनां प्रम्लानता ।

५. ग्रहणकाले समुद्रस्य जलस्तरवृध्दिः न्यूनता च।

६. पूर्विमायाम उन्मत्तानाम् अत्युग्रत्वम् ।

७. पूर्णिमायां समुद्रे चन्द्रमसं दृष्ट्वा जलस्य अतिवृद्धि न्यूनता च इत्यादीनां अनेकवृत्तान्तानां प्रत्यक्षीभवनेन प्रकृतिः सूक्ष्मतया अध्येतुं शक्यते ।

ज्योतिषशास्त्राचार्याः जगति भवतीनां सर्वासां घटनानां कारणान् तथा च तासां प्रभावांश्च ज्ञातुं प्रयेते ।

कस्मिंश्चिद् विशेषकालखण्डे कस्मिंश्चित् विशिष्टक्षेत्रे कस्याश्चित् विशिष्टायाः समस्यायाः उत्पत्तिः । एकसमयसीमायां तत्रत्य क्षेत्रस्य जनाः प्रभाविताः, भवन्ति पुनः स्थितिः सामान्या भवति । एतत्सर्वं समष्टिगत् प्रभावान्तर्गतो भवति । स्थित्योयं तथैवास्ति यथा एकग्रहस्य एकस्मिन् विशेषकालखण्डे कस्याञ्चित् राशौ गमनं, तत्र निश्चितकालं यावत् स्थितिः पुनः राशिपरिवर्त्तनम् । कदाचित् द्वित्राधिकाः ग्रहाणां प्रतिकूलानुकूलप्रभावोः अपि भवितुमर्हति । क्षेत्रविशेषे अनुकूलप्रतिकूलयोश्च प्रभावं दृष्टिम् अयाति । यथा महामारी, अनावृष्टिः, अतिवृष्टिः भूकंप इत्यादः कश्मिंश्चिद् क्षेत्रविशेषे , ऋतुविशेषे शस्यविशेषस्योत्पत्तिः अयमपि समष्टिप्रभावान्तर्गतेव समायाति ।

कालज्ञानं विना कोऽपि जनः किमपि कर्तुं न प्रभवति तथैव कालं विना कोऽपि जीवः क्षणमपि स्थातुं न शक्ष्यति यतः कालविधायकं शास्त्रं ज्योतिषमेव । अत एव शास्त्रस्यास्य कालविधायकत्वं सर्वैरेव सर्वत्राऽनुभूयते । यथा-

**लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः ।**

**स द्विधा स्थूलसूक्ष्मत्वात् मूर्त्तश्चामूर्त उच्यते ।।**[६]

ग्रहाणां जीवेषु व्यष्टिगतप्रभावः कथं भवति ? प्रकृतिः प्रत्येकेषु जीवेषु कालः, स्थानं इत्यनयो आधारे मूलभूतं भेदं कथं करोति उदाहरणमाध्यमेन पश्यामः ।

अद्यत्वे पृथिव्यां ८ अर्बुदाधिकाः जनाः वर्त्तन्ते । एतावती संख्या भवति पुनरपि प्रकृतिः प्रत्येकमपि विशिष्टं करोति यथा त्वच्यङ्गुलिचिह्नानि प्रत्येकस्य जनस्य कृते अद्वितीयानि भवन्ति । यनि प्रत्येक जीवात्मा स्थानकालः इत्यनयोः सूक्ष्मक्षणाधारेण प्रकृतेः प्राप्य अपरेभ्यः जीवात्मभ्यः आत्मानं अद्वितीयं करोति इदं स्पष्ट भवति ।

अयं समस्तः ब्रह्माण्डः कालेप्रवाहेन प्रभावितः । तस्य विराट् पुरुषस्य अदृश्यभूर्त्तिः कालशक्तिरेव भवति । अतः ग्रह, नक्षत्रम, नीहारिकाः, , उल्का, सोम, सूर्य, चलावलपिण्डश्च इत्येते सर्वेऽपि कालजन्याः। कालः सा शक्तिः भवति यत् एतान् पिण्डान् उत्पादयति अन्तिमे स एव विलीयते ।

यथा- **'कालः पचति भूतानि'**

**'कालोस्मि लोकः क्षयकृत प्रवृत्तः'**

**'काले सर्वं प्रतिष्ठितम्'**

एतासु सूक्तिषु कालशक्तेः महिमायाः आख्यानं भवति ।

इयं संहारकत्वात् अनन्तः अखण्डः च भवति कलनात्मकत्वात् त्रुटि इत्यादीनाम् अवयवेषु पठितमस्ति ।

अस्माकं ज्यौतिषशास्त्रे व्यक्ताव्यक्तगणितम् अर्थात् बीजगणितम, अंकगणितम् इत्यनयोः कल्पना विहिता । ब्रह्मनिर्गुणं भवति , अव्यक्तगणितमपि निर्गुणं ज्याचापरहितं भवति । तथैव व्यक्तगणितमपि गुणनं भजनं इत्येताभ्यां क्रियाद्वारा ब्रह्म आत्मस्वरूपं प्रत्यक्षी करोति । अस्मादेव व्यक्ताव्यक्तगणितं ब्रह्मशक्तिः इत्यनयोः साम्यं सिद्धमेव । अतः अस्मद्यक्ताव्यक्त गणिते अपि ब्रह्मशक्तेः आभासः सुस्पष्ट एव ।ज्योतिषशास्त्रस्य प्रवर्तकाचार्याः कालं बहुसूक्ष्मत्वेत वर्णयाञ्चकार, तैः सूक्ष्मगणनया यानि कारणानि अवाचिषत, तथा च दीर्घकालं यावत् अवलोकनानन्तरं कारणानुपाते ये प्रभावाः अवादिषत तत्र मिथ्याभावः एव । यदि अद्यत्वे जनाः तान् नैव अवगमने समर्थाः तर्हि नास्ति तत्र अस्मदाचार्याणां दोषः । अद्यतनजनाः एवं गणनायां अकुशलाः, अस्मच्छात्रेषु तु “त्रुटि” यावत् गणना कथयाञ्चक्रे त्रुटि सम्बध्दम् आचार्या ऊचुः ।

**“सूच्या भिन्ने पद्मपत्रे त्रुटिरित्यभिधीयते ।**

**तत्षष्टया रेणुरित्युक्तो रेणुषष्टया लवः स्मृतः ।**

**तत्षष्टया लीक्षकं प्रोक्तं तत्षष्टया प्राण उच्यते”** ।[७]

इत्युक्तेः-

| **भारतीयकालः** | **पाश्चात्यकालः** |
|---|---|
| १ त्रुटिः = सुच्या पद्मपत्र भेदन कालः | = १/३२४०००० सेकेण्ड |
| १ रेणुः =६० त्रुटयः | = १/५०००४ सेकेण्ड |
| १ लवः = ६० रेणवः | = १/९०० सेकेण्ड |
| १ लीक्षकम् = ६० लवाः | = १/१५ सेकेण्ड |
| १ प्राणः=६० लीक्षकाणि=१० दीर्घाक्षरोच्चारणकालः | = ४ सेकेण्ड |
| १ पलम् (विघटी )=६ प्राणाः= ६० विपलानि | = २/५ मिन्ट |
| ५/२ पलम् | १ मिन्ट |
| १ विपलम्=१ दीर्घाक्षरोच्चारणकालः=प्राण ÷ १० | = २/५ सेकेण्ड |
| १ नाड़ी (घटी) = ६० पलानि = १ दण्डः | = २४ मिन्ट |
| १ नाक्षत्राहोरात्रम् = ६० नाडयः=६० दण्डाः | = २४ घण्टा |
| १ मासः = ३० अहोरात्राणि | = १ मन्थ |
| १ वर्षम् = १२ मासाः | = १ एयर |

यस्मिन् क्षणे जातकः जायते, तत्क्षणे आकाशे स्थितानां ग्रहनक्षत्रताराणां स्थितिः, विकिरणानां प्राथमिकः संबन्धः तेन नवजातेन संवेदनशील जातकेन साकं यदा भवति तदा तस्मिन् काले तस्य प्रकृतिः सकलतत्वैः सार्धं तस्य आनुकूल्यं, प्रतिकूलना, आरोग्यं च इत्यादिकं सुनिश्चितं भवति ।

यस्मिन् कालखण्डे क्षेत्रविशेषे चाहम् अजनिषि तत्र यदि किञ्चिदपि परिवर्तन अभविष्यत् चेत् अद्याहं यद्दशः तादृशः अवश्यमेव ना भविष्यम् , मम स्वभावः विचारश्च यादृशः तथा नैवा भविष्वत् । वयं अन्वभूवम् यत् बालकौ दो युग्मजौ प्रायः समानावेव भवतः यथा उभयोः रूपम् व्यवहारः, स्वभावः इत्येत्सर्वं साम्यं एकस्थाने एकस्मिन्नेव कालखण्डे जन्मकारणात् तौभ्यां प्राप्यते, इत्थमवगम्यते यत् उभावपि एकसदृशाकृतिवन्तौ स्तः यत् किमपि भेदः तयोः भवति तत्र तयो जन्मकालखण्डे एक क्षणस्य भेदः भवति सः एव हेतुः । ज्योतिषस्य गणनायां प्रेन प्रत्येकक्षणगणनायाः महत्वं भवति यतोहि अस्माकं ऋषयः ज्योतिषे त्रुटि यावत् गणनां चक्रुः यथास्माभिः पूर्वमुल्लेखितम् विश्वप्रसिध्दः महान् गणितज्ञः भास्कराचार्यसमः दैवज्ञः "त्रुटि" सिध्दान्तर्गते कालस्य १।२४००० निमेषेषु विचार्य इष्टकालं सुनिश्चितं कृत्वा नूनमेव फलकथनं किया कर्तुं शक्यते परन्तु सामान्यतया एवं नैव भवति । जन्मकालं निर्धारणं कुर्वन्तः जनाः सावधानः नैव भवन्ति । अत एव फलकथन काले फलं शतप्रतिशत् सत्यं नैव भवति । एवं च ज्योतिषमन्येषु अङ्कितान ग्रह नक्षत्र राशिफलान् समानरूपेण प्रायः सर्वेषां कुण्डलीषु लिखन्ति । ज्ञात्वव्यमिदं यत् प्रत्येक जनस्य प्रारब्धः, ग्रहदशा, नक्षत्रप्रभावः एवं च राशिफलचक्रं भिन्नं एवं भवति । एवं ब्रह्माण्डस्य समस्तपिण्डेषु पारस्फरिक प्रभावानां संज्ञानं भवति । अतः भारतीयायुर्वेदस्य अष्टाङ्ग चिकित्सापध्दत्यां प्रत्येकग्रहः चिकित्सापद्धत्यां महत्वपूर्णस्थानं लभते । वयं तदा एव अस्वस्थाः भवामः यदा जन्मकाले ग्रहनक्षत्राभ्यां प्राप्तः तारतम्यः अस्मत् भिद्यते, वयं तद्रोगसंबधीनीं औषधिं भुक्त्वा किञ्चित् कालाय तं रोगं अपसारयामः । पुनः औषधिप्रभावगते अस्वस्थाः भवामः । प्राचीन काले बहवः वैद्याः कुडलीमवलोक्य एव औषधिम् ददति स्म तथा च असाध्यरोगाः अपि चिकित्स्यन्ते स्म । ते वदन्ति स्म यावत् पर्यन्तं अहं जन्मसमये प्राप्त जातकस्य ग्रहनक्षत्रैः साकं संबन्धं नैव ज्ञाते सति तवत् पर्यन्तं चिकित्सां न कर्त्तुं शक्नोमि । शरीरस्य आंतरिकव्यवस्था ज्ञात्वा उपचारः सरलः भवति ।

कस्यचित जातकस्य जन्मनः पूर्वकालीनं स्थानं यत्र तस्य पितरौ, न्यवात्ताम्, तस्मिन भूभागे ग्रहप्रभावित प्राकृतिके वातावरणे यदन्नं उत्पद्यते, तदन्नं भुक्त्वा तस्य पित्रोः शरीरे यद्रक्तं निर्मितं, तेन रक्तेन तस्य जातकस्य गर्भाधानमभूत्, एवञ्च जन्मनः पश्चात् केनचित् कारणेन सः स्थानं परिवर्तते तथा च जन्मभूमिं विहाय अपरस्थाननिवासी भवति, तदा सः स्वास्थकारणेन दुःखितः दुःखी भवितुमर्हति । यस्मिन् प्राकृतिक वातावरणे शरीरं विनिर्मितं अस्वस्थकारणेन यदि सः स्वजन्मभूमि कानिचिद् दिनानि निवसति , तदा स्वास्थ्यलाभे संभावना अधिका भवति ।

ज्योतिषशास्त्रे नवग्रहास्सन्ति- सूर्यः, चन्द्रः, मङ्गलः, बुधः, गुरुः, शुक्रः, शनिः, राहुः केतुश्च । ज्योतिषशास्त्रे नवग्रहेषु सूर्यग्रहस्योपासना प्राचीनतमा वर्तते, वैदिककाले सूर्यपूजनं देवरूपे भवति स्म । किन्त्वद्यतनकालेऽसौ सूर्यः केवलं ग्रहरूप एव मानवेन समर्च्यते । सूर्यादिनवग्रहाणां विषये जातकग्रन्थेषु विस्तरेण प्रतिपादितमस्ति । यथा-

**सूर्यः-** हेली, दीप्तरश्मिः, विकर्तनः, अहस्करः, तपनः, पूषा, अरुणः, अर्कः, वनजवनपतिः, दिनमणिः, मार्तण्डः, उष्णरश्मिः, उष्णांशुः, प्रभाकरः, तीष्णांशुः, तीक्ष्णरश्मिः, नगः, नभेश्वरः, इत्यादि नामभिः व्यवह्रियते । आत्मनः कारकोक्तः आदित्यः, **सूर्य आत्मा जगतस्तस्थुषश्च** इत्युक्तत्वात् । तावत् सिंहराशेः स्वामी वर्तते सूर्यः । पितुः प्रतिनिधित्वमावहती सूर्यः । सिंहस्य, वनस्पतेः, ताम्रस्य, स्वर्णाभूषणादीनामपि कारकः भगवानादित्यो भवति । भगवतः आदित्यस्य निवासस्थलं देवालयः, सरित्, भवनम्, अरण्यमस्ति । सूर्येणास्माकं शरीरे हृदयोदरमुखादीनां विचारः क्रियते । अनेन खल्वाटत्वगाक्षिशिर-रक्तचापज्वरसम्बद्घाः व्याधयः भवन्ति । सूर्यो पुरुषग्रहः वर्तते । सूर्यः क्षत्रियोऽस्तीत्यङ्गीक्रियते । कषायरसोऽस्य ग्रहस्य वर्तते । पूर्वदिग्स्वामिरस्ति सूर्यः । यस्य व्यक्तेः सूर्योच्चो भवति सः सार्वजनिकजीवने राजनैतिकक्षेत्रे चोच्चादर्शैः स्वीयजीवनं यापयति तथा वक्त्रे तस्य पृथगेव भवति तेजः । सूर्यः घृतगोधूमपाषाणमाणिक्यादिषु पदार्थेषु स्वप्रभावं स्थापयति । उदरव्याधीनां कारणं सूर्यग्रह एव भवति । सूर्यग्रहो पित्तव्याधीनुत्पादयति । अस्य ऋतुः तावत् ग्रीष्मः वर्तते ।

**ताम्रं स्वर्णं पितृशुभफलं चात्मसौख्यप्रतापं धैर्यं शौर्यं समितिविजयं राजसेवां प्रकाशम् ।**

**शवं कार्यं वगिरिर्गात होमकार्यप्रवृत्ति देवस्थानं कथयतु बुधस्तैक्ष्ण्यमुत्साहमर्कात् ॥**[८]

**सूर्यो हेलिर्भानुमान्दीप्तरश्मिश्चण्डांशुः स्याद्भास्करोऽहस्करश्च ।**[९]

**चन्द्रः-** इन्दुः, सोमः, हिमांशुः, विधुः, कलानिधिः, निशाकरः, क्षपाकरो, नक्षत्रेश इत्यादिभिः नामभिः व्यवह्रियते । ग्रहोऽयं सुन्दरो दिव्यबाहुः मनमोहको युवा गौरवर्णीयश्चेति वर्णनं प्राप्यते । अस्य ग्रहस्यैकस्मिन् हस्ते मुद्गरोऽपरे च पद्मो भवति । चन्द्रमा आकाशे स्वरथं चालयति । शुभ्रवर्णीया अस्य रथाश्वाः भवन्ति । निशाया देवतास्त्यतो निशाधिपतिरुच्यते । मनसो मातुश्च प्रतिनिधित्वमावहती चन्द्रमा। असौ ग्रहः सत्वगुणप्रधानोऽस्ति । मनसः प्रतिनिधित्वं विशेषरूपेण करोति **'चन्द्रमा मनसो जातः'** इत्युक्तत्वात् । स्त्रीग्रहोऽस्त्येषः ।

**मातुः स्वस्ति मनःप्रसादमुदधिस्नानं सितं चामरं**

**छत्रं सुव्यजनं फलानि मृदुलं पुष्पाणि सस्यं कृषिम् ।**

**कोतिं मौक्तिककांस्यरौप्यमधुरक्षीरादिवस्त्राम्बुगो-**

**योषाप्ति सुखभोजनं तनुसुखं रूपं वदेच्चन्द्रतः ॥**[१०]

**अब्जः सोमश्चन्द्रमाः शीतरश्मिः शीतांशुः स्याद् ग्लौर्मृगाङ्कः कलेशः ।**[११]

**मङ्गलः-** रक्तवर्णीयोऽस्ति मङ्गलग्रहः । ज्योतिषशास्त्रे सेनापतित्वेनोच्यते मङ्गलग्रहः । क्रूरग्रहोऽसौ । ब्रह्मचारिरस्ति मङ्गलः । वृश्चिकमेषयोः स्वामी मङ्गलोऽस्ति तथा कर्कराशौ नीचो मकरराशावुच्चो भवति । अङ्गारकोऽप्युच्यते मङ्गलः, यश्च रक्तवर्णस्य कारको भवति । पृथिव्याः पुत्रः मङ्गलोऽस्ति । मेषोऽस्य वाहनमस्ति तथा मङ्गलस्य करे शूलं वर्तते । भौमवासरस्यायमधिपतिरस्ति । तमसगुणप्रधानप्रकृतिको मङ्गलोऽस्ति । ग्रहोऽसावात्मविश्वासस्य, कार्ये शीघ्रतायाः, ऊर्जस्वानस्तथा चाहङ्करादीनामपि प्रतिनिधित्वं करोति । जातकस्य यस्य मङ्गलग्रहो बलवान् भवति तस्मिन् जातके पूर्वोक्तगुणा दृश्यन्ते । सः जातकोऽत्यधिकः क्रोधप्रकृतिको भवति ।

**सत्त्वं भूफलितं सहोदरगुणं क्रौर्य' रणं साहसं**

**विद्वेषं च महानसाग्निकनकज्ञात्यस्त्रचोरात्रिपून् ।**

**उत्साहं परकामिनीरतिमसत्योक्ति महीजाद्व दे-**

**द्वीर्य चित्तसमुप्रति च कलुषं सेनाधिपत्यं क्षतम् ॥**[१२]

**आरो वक्रश्चावनेयः कुजः स्याद्भौमः क्रूरो लोहिताङ्गोथ पापी ।**[१३]

**बुधः-** त्वचः वाण्याश्च कारकः, वाणिज्येशश्च बुधग्रहो वर्तते । बुधग्रहः चन्द्रतारकयोश्च सुतोऽस्ति। राजकुमार इत्युच्यते ज्योतिषशास्त्रे । हरितवर्णबुद्ध्योश्च कारकोऽस्ति । ग्रहोऽसौ शान्तः सरसश्चास्ति । क्लीबश्चायं ग्रहः उद्योगपतीनां त्राता, रजोगुणप्रधानः, बुधवासरस्याधिपतिरस्ति । बुधग्रहः सूर्यग्रहस्य प्रियग्रहोऽस्ति । बुधग्रहस्यैकस्मिन् करे कृपाणं द्वितीये मुद्गरढालौ च स्तः । वाहनप्रियग्रहोऽस्त्यसौ।

**पाण्डित्यं सुवचः कलानिपुणतां विद्वत्स्तुति मातुलंवाक्चातुर्यमुपासना दिपटुतां विद्यासु युक्ति मतिम्।**

**यज्ञं वैष्णवकर्म सत्यवचनं शुक्ति विहारस्थलं शिल्पं बान्धवयौवराज्यसुहृदस्तद्भागिनेयं बुधात् ।।**[१४]

**विज्ज्ञः सौम्यो बोधनश्चंद्रपुत्रश्चांद्रिः शान्तः श्यामगात्रोऽतिदीर्घः ।** [१५]

**गुरुः(बृहस्पतिः)-** समेषां ग्रहाणां गुरुः बृहस्पतिः तथा धर्मशीलयोश्चावतारो वर्तते । बृहस्पतिग्रहः प्रार्थनानां बलिदानानाञ्च प्रस्तावको देवतानां पुरोहितः कथ्यते । बृहस्पतिः ज्योतिषे मन्त्री ज्ञानदेवश्चोच्यते । यः मतिज्ञानधर्मणां प्रतिनिधित्वं करोति । सत्वगुणस्य प्रधानताऽस्मिन् ग्रहे भवति । बृहस्पतिरेकः पुरुषग्रहो वर्तते । बृहस्पतिग्रहो एकस्मिन् करे घटिकामपरेऽस्मिन् करे मालाञ्च धारयति । धनुर्मीनयोः स्वामी वर्तते तथा च मकरे नीचः, कर्के उच्चो भवति ।

**ज्ञानं सद्गुणमात्मजं च सचिवं स्वाधारमाचार्यकं माहात्म्यंश्रुतिशास्त्रधीस्मृतिर्मात सर्वोन्नति सद्गतिम्। देवब्राह्मणभक्ति मध्वरतपःश्रद्धाश्च कोशस्थलं वैदुष्यं विजितेन्द्रियं धवसुखं संमानमीडयाद्दयाम् ॥**[१६]

**जीवोंऽगिरा देवगुरुः प्रशान्तो वाचांपतीज्यत्रिदिवेशवंद्याः ।**[१७]

**शुक्रः-** दैत्यानां परमं गुरुर्वर्तते शुक्रः । शुक्रः स्वच्छता-भास्वता-स्पष्टता-शुद्धतेत्यादिभिः परिचीयते । सकलैश्वर्यस्य प्रतिनिधित्वमसौ करोति । यस्य जातकस्याथवा जातिकाया जन्मकुण्डल्यां शुक्रग्रहोऽधिको बलवान् भवति सः/सा सर्वविधसुखानामुपभोगं करोति । अस्य ग्रहस्य नाम भृगुः उशानश्च विद्यते । भृगुवासरस्य स्वामी वर्तते यश्च राजसीप्रवृत्तियुक्तोऽस्ति । ज्योतिषशास्त्रे च शुक्रग्रहो मन्त्री तथा कामवासनारूपेणाङ्गीक्रियते । शुक्रग्रहः स्त्रीग्रहः, प्रजननस्य प्रतिनिधित्वमप्यसौ करोति । अयं श्वेतवर्णः, मध्यमायुः तथा शान्तप्रकृतिको वर्तते । घटिपद्ममालाधरः शुक्रग्रहो मकरेऽश्वे वारूढोऽस्ति। वैभवकारकग्रहः शुक्रो वर्तते । तुलावृषराश्योः स्वामी शुक्रः, कन्यायां नीचः, मीने चोच्चो भवति ।

**संपद्वाहनवस्त्रभूषणनिधिद्रव्याणि तौर्यत्रिकं भार्यासौश्यसुगन्धपुष्पमदन व्यापारशय्यालयान्। श्रीमत्त्वं कवितासुखं बहुवधूसङ्ग विलासं मदं साचिव्यं सरसोवितमाह भृगुजादुद्वाहकर्मोत्सवम् ॥**[१८]

**भृगूशनो भार्गवसूनवोऽच्छकाणौः कविर्दैत्यगुरुः सितश्च ।** [१९]

**शनिः-** तमसप्रकृतिको शनिः सूर्यस्य पुत्रोऽस्ति । शनिः भृत्यः इति ज्योतिषशास्त्रे उक्तः । शनिः क्लीबग्रहोऽप्युक्तः । शनिवासरस्य स्वामी अस्ति शनिः । मकरकुम्भराश्यो अधिपतिरयं तुलाराशावुच्चः, मेषराशौ च नीचः भवति । सामान्यतया शनिग्रहः, दीर्घायुः, कठोरकर्मणां प्रतिनिधित्वम् आजीविकाञ्च दर्शयति । शनैः शनैः यात्यतोऽयं ग्रहः शनैश्चरोऽप्युच्यते । परस्परं शत्रुग्रहौ स्तः शनिसूर्यौ।

आयुष्यं मरणं भयं पतिततां दुःखावमान। मयान् दारिद्यं भूतकापवादकलुषाण्याशौचनिन्द्यापदः । स्थैर्य नीचजनाश्रयं च महिषं तन्द्रीमृणं चायसं दासत्वं कृषिसाधनं रविसुतात्कारागृहं बन्धनम् ॥[२०]

**छायात्मजः पङ्गुयमार्कपुत्राः कोणोऽसितः सौरिशनी च नीलः ।**

**क्रूरः कृशाङ्गः कपिलाक्षदीर्घो तमोऽसुरश्चेत्यगुसैंहिकेयौ ।** [२१]

**राहुः-** सर्पः, असुरः, फणिः, तमः, सैंहिकेयः, अगुः, अहिः, तमाः, तमोगुः, तमोमयः, धूमग्रहः, नभाकः, विधुन्तुदः, स्वर्भानुः, इत्यादि नामभिः व्यवह्रियते । तमोग्रहसंज्ञकोऽयं राहुः । ज्योतिषशास्त्रे राहुकालोऽप्यशुभो मन्यते । राहुग्रहस्योच्चराशिः वृषभः/मिथुनः तथा वृश्चिकः/धनुः नीचराशिः मन्यते । राहुग्रहरेको छायाग्रहोऽस्ति ।

**राहुस्तु स्वर्भानुविधुन्तुदौ स्यात्केतुः शिखी स्याद्ध्वजनामधेयः ।**[२२]

**केतुः-** शिखी, ध्वजः, शनिसुतः, गुलिकः, मान्दि, यमात्मजः, प्राणहरः, अतिपायत्यादिनामभिः व्यवह्रियते । छायाग्रहरूपेणाङ्गीक्रियतेऽसौ ग्रहः । केतुग्रहस्य मानवजीवनोपर्यत्यधिकः प्रभावो भवति । केतुग्रहः एकः पापग्रहो वर्तते । बाधाकारकश्चायं केतुग्रहः वृश्चिकधनुराशावुच्चः तथा वृषभमिथुनराशौ नीचो भवति ।

**शनेः सुतः स्याद्गुलिकोऽथ मांदिर्यमात्मजः प्राणहरोऽतिपापी ।**[२३]

प्रसूतिकाले जन्मकाले बलयुक्ताः सूर्यादयो- ग्रहाः नराणां निजरूपतुल्यप्रकृतिं निश्चितं कुर्वन्ति । अनेके बलिनो ग्रहाः समागताः चेत्, मिश्रितं, प्रकृतिं कुर्वन्ति ।

**एते ग्रहा बलिष्ठाः प्रसूतिकाले नृणां स्वमूर्तिसमम् ।**

**कुयु देहं नियतं बहवश्च समागता मिश्रम् ॥**[२४]

ज्योतिर्विज्ञानं खगोलीयपिण्डानाम् अध्ययनस्य विज्ञानं वर्तते। दैवज्ञाः अनेकवारं भविष्यं वदन्ति । तेषां सत्यावाणी अपि भवितुमर्हति असत्यता अपि । यदा सत्या भवति तदा संयोगमात्रमिदमिति अनाः ब्रुवन्ति । यदा असत्या भवति काश्चित् त्रुटीः अधिकृत्य एव संपूर्णं ज्यौतिषशास्त्रमेव मिथ्यात्वेन सिध्दं कुर्वन्ति । अनेके चिकित्सकाः यदि सुष्ठुतया नैव उपचरन्ति तदानीं आचिकित्सा शास्त्रं नैव मिथ्यात्वेन निर्णीयते। अत्रेदमवधेयम् ज्योतिर्विज्ञानं भविष्यमेव नैव कथयति । भविष्य सम्बन्धी विषयोऽस्य लघुतमः "फलित भागः" जनाः विश्वस्ताः पूर्णतया यत भविष्यं नैव ज्ञातुं शक्यते परञ्च ते अल्पज्ञाः एव यतोहि कस्याश्चिद् घटनायाः पूर्वं तस्याः कारणं निश्चप्रचमेव भवति मानवस्य व्यावहारिके जीवने ज्यौतिषं महत्वपूर्णतमं स्थानं भजते, ग्रहाणां नक्षत्रस्थित्यनुसारं शस्यानां बीजवपनं, रोपण, आरोग्यं, कर्त्तनं, क्षेत्रात् आनयनम्, एकत्रीकरण इत्यादीनि सकललौकिककार्याणि व्यवह्रियन्ते । ग्रहाणां गतिः, स्थितिः, संचारः शुभाशुभत्वस्य अनुसारं ज्योतिषशास्त्रज्ञाः कृषकान् पूर्वमेव सूचयन्ति यत् कस्मिन् नक्षत्रे कियती वृष्टिर्भविष्यति एवं च किमन्नं अस्मिन् वर्षे फलवत् भविष्यति निष्फलं च भविष्यति । एतत्सर्वं विज्ञाय कृषकाः पूर्वमेव सावधानाः भवन्ति, एवं च उर्वरकमन्नमेव वपन्ति, लाभान्विताश्च भवन्ति। वणिग्जनाः अपि अनेन शास्त्रेण लाभं गृह्णन्ति। ग्रहाणां संक्रान्तिः, नाक्षत्रिकः सञ्चारः, शुभाशुभदिनानां सङ्ख्यायाः ऊनाधिक्य ग्रहाणामुदयः, अस्तम्, मार्गः, वक्रः, चन्द्रकला, श्रृङ्गोन्नतिः इत्यादीनां आधारेण किं वस्तु कदा न्यूनमूल्यस्य कदा च महार्घं भवति पुनः तदनुसारमेवविक्रीय लाभान्विताः भवन्ति । इत्थं आकाशमण्डलस्य ग्रहाणां नक्षत्राणां च विषम्, अमृतं तथा च उभयगुणमिश्रितकिरणानां कारणेन तेषां प्रभावः प्रत्येकस्मिन् काले, प्रत्येकस्मिन् स्थाने च एक सदृशं नैव भवति । गतिविलक्षणता कारणेन कदाचित् ईदृशानां ग्रहाणां नक्षत्राणां प्रभावः स्व-स्व गुणानां तत्वानां च विशेषताकारणेन कस्मैचित् विशिष्टकार्याय एव सिद्ध्यै उपयुक्ता भवन्ति । एतदर्थमेव ज्योतिषस्य मुहूर्तानां मार्मिकव्यवस्थायां विधानं कृतम् । अस्माकं ऋषयः वातावरणं, तस्य प्रभावं च स्वस्याध्यात्मिकदृष्टिमाध्यमेन प्रत्यक्षीकृत्य तान् जनहिताय आदेशात्मकेन ज्यौतिषशास्त्रेण प्रतुष्टुवुः अत एव विभिन्नकार्येभ्यः मुहूर्तसंशोधनं अन्धपरंपरा नास्ति अन्धविश्वासश्च नैव वर्तते। ज्योतिषशास्त्रं विज्ञानसम्मतं वर्तते, रहस्यपूर्णमस्ति । इदं शास्त्र मानवकल्याणस्य संवाहकः, पोषकः, उद्धारकः, संरक्षकः, उन्नायकश्च विद्यते ।

स्रोत एवं संदर्भ सूची


□. आर्चज्योतिषम्, श्लो.सं. २

□. सि.शि., मध्यमाधिकारे, श्लो.सं. ९-१२ व्याख्यासन्दर्भे

□. अध्यात्मरामायणम् (२।६।६)

□. बृहज्जातकम्, राशिभेदाध्यायः श्लो.सं. १.३

□. .बृहतसंहिता “आदित्यचाराध्यायः"(२६ )कुसुमलताध्याय:" (१) पृष्ठसंख्या (१८८)

□. सूर्यसिद्धान्तम्, श्लो.सं. १०

□. सूर्यसिद्धांतः "श्रीकपिलेश्वरशास्त्रिणा" पृष्ठसंख्या (६,७)

□. फलदीपिका ग्रहभेदाध्यायः (२/१)

